CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 145.

Title 'SIVALINGAPRATISTHAVIDHI.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 145 Subject: Tantric Ritual

Title: Śivalingapratiṣṭhā vidhi.

Author: Nārāyaṇa Bhaṭṭa Scribe: Lesaka.

Date of the work: — Date of the Ms.: V.S. 1743

Place of the work: — Place of the Ms.: Abjapura

Size: 9-5" by 5·5" Extent: Roll 6.

Language: Sanskrit. Script: Devanagari.

Remarks: Complete

॥श्रीगुरुभ्यो नमः॥ अथ शिवलिंगप्रतिष्ठाविधिः॥ अथ लब्धविप्राशीः सबंधुर्भक्त्याथो नरोत्तेनि
त्यं निर्विघ्नः क्षमाशीलवृत्तसंपन्नं गुरुस्तमाचार्यमृत्विजश्च नाहूय गन्धोडशाष्टौ चतुरो वा वि
धिनाहूत्वा वस्त्रालंकारादिभिः पूजयेत्॥ द्विगुणमाचार्याय। ततः सूर्यवेदघोषैः महाप्रतिष्ठा
स्थानं गत्वा प्रसादस्याग्रे द्वादशहस्तं चतुर्द्वारं प्रागारमयं प्लक्षोदुंबराश्वत्थन्यग्रोधतो
रणं लंबहारश्चाषिहेमरक्तरत्नसधूम्रमौक्तिक विचित्रप्रवाल श्वेतवर्णध्वजपताकाभिः प्र
वर्धितद्विरूपशोभितं मंडपं तन्मध्ये चतुरस्रां पंचहस्तामेकहस्तोच्छ्रितां वेदिं च कारये
त्। तत्पार्श्वे विदिक्षु कुंडानि हस्तमात्राणि चतुरस्राणि सयोनिमेखलानि स्युः॥ आचा
र्यः कुंडमेखलायां तद्विहोमसमाधानं प्रतिष्ठाप्य मंडपस्योत्तरतो देवस्नानमंडपं स्तनद्रु
५ काष्ठैः कृत्वा अभिषेकसाधनानि स्थापयित्वा शिल्पिगृहात् देवं प्रासादद्वारदेशे
नानीय स्नानासने वस्थाप्य सर्वमंत्रान् संकृत्य स्नातः प्राणानायम्य प्रतिष्ठाप्यदेवता
मंत्रेण त्रिविधं न्यासं कृत्वा देशकालौ स्मृत्वा ॐ प्रतिष्ठां करिष्यामीति संकल्प्य द्वारजा
पकान् स्वविग्राचार्यान् स्वस्वकार्ये नियोजयेत्॥ अथाचार्यः प्राणायम्य मंत्रदेवमयो भूत्वा १

यागभूमिं प्रासादं स्नानशालां चापोहिष्ठेति कुशोदकेनाभ्युक्ष्य सितसर्षपान् प्रकीर्य
देवगायत्र्यां तु॥ यातुधाना अपयांतु विघ्नो देवयज्ञनं रक्षस्वेति रक्षां कृत्वा प्रतिद्वारं कल
शाद्यं सोदकं सपल्लवं प्रतिष्ठाप्य लोकपालानावाह्यार्चयित्वा देवस्नानशालां गत्वा प्र
णिपत्य देवं प्रार्थयेत् स्वागतं देवदेवेश विश्वरूप नमोऽस्तु ते शुद्धेपि त्वदधिष्ठाने शुद्धिं क
र्मः सह स्वतामिति ततो देवाधिष्ठानं श्रुष्टेन घृतेनाभ्यज्य उद्वर्तनद्रव्येणोद्वर्त्य उष्णोद
केन स्नपयित्वा पीठांतरे वस्थाप्य सुगंधेनालिप्य दिव्यधूपेन धूपयित्वा पुष्पैः संपूज्य
नवोत्तमवाससा वेष्टयित्वा परमान्नेन बलिं दद्यात् ततो लिंगमर्चां वा द्वादशवारं मृद्द
केन पंचगव्येन पंचामृतेन च संशोध्य गजाश्ववराहोत्खात अरण्यवल्मीकसंगम
ह्रदराजद्वाराग्निहोत्रस्थानानीति मृद्भिः आद्यकलशे निक्षिप्य द्वितीयकलशे क्षीरवृक्ष
पल्लवं तृतीये व्रीहिनीवारश्यामाकादिधान्यं चतुर्थे गंधपुष्पफलानि क्षिप्त्वा आपोहि
ष्ठा योवः शिवतमो तस्मा अरं आकलशेष्विति च तस्त्रभिः क्रमेणाभिषिच्य समु
द्रज्येष्ठेति सहस्रकेन कलशात् चतुष्टयोदकेनाभिषिच्य पीठांतरे निवेश्य अग्निनोद

स्वयुग्मेनर्चयित्वा देवं चाधिवेश्य स्नानगंधपुष्पधूपदीपाष्टकमाल्यनैवेद्यैः प्रज्य· ततः सपात्रस्थं मधुसु
वर्णशिलाकया गृहीत्वा· चित्रं देवानामिति मंत्रेण स्वयं पार्श्वे स्थित्वा सत्यघोषमेकैकं नेत्रं सम
म्योन्मीलयेत्। तदानकं मिथुरत तिष्ठेत्· अपादर्शनिसनोऽप्यानिदर्शयेत्। सुवर्णशिक्याग्रं
धेनवालत्तएणं लिंगाकारं· ॐ नमो भगवते रुद्राय हिरण्यरेतसे परायपरात्मने विश्वरूपाय
उमाप्रियाय नमः इति मंत्रेण संलिख्य· यथाशास्त्रं शिल्पिभिः स्फुटं कारयित्वा· तत्र मधं
जनं कार्यं· नबाणरत्नपर्वतलिंगेष्विति विशेषः। तत्राचार्यपि धेनु· ब्राह्मणेभ्यश्च यथाश
क्ति हिरण्यं दद्यात्। ततऽॐमनुनिःशब्द्र लणस्पतइत्यनुवाकमनिक्रंदति स्त्रूक्तपाठैः सद
मंदंडुपं प्राह्लिएपेवात्तरद्वारेण देवमालक्ष्मीनेत्यानीय वेद्यां कुशप्रस्तरे· कशिपुंसु
खस्वेणाघ· प्राक् शिरसं देवं शाययेत्। तन्निरप्रदेशे वस्त्रवेष्टितं· संपद्मवंकलशं
प्राजापत्योयं मुहूर्तोस्त्विति उक्त्वा· मंगलद्रव्यापरिपूर्णवेनावस्थाप्य समंताद्धस्यनोज्य
मंगलद्रव्याण्यवस्थाप्य· मध्वाज्यसर्षपतिलपिष्टेन देवमाप्यायस्वेत्यृचोद्वर्त्य· प्रति
मायांउम्बेताऽविलोम· स्तनकंकणं हस्तेबध्रीयात्। ततो देवे पुरुषादीनि पंचविंश २

तितत्त्वानि निवेश्य· दिव्यवाससाछाद्य देवं संस्मृत्य पुरुषसूक्तेन स्तुत्वा· पुष्पांजलिं दत्वा
गंधपुष्पादिभिर्मंडपं वेदिं चाभ्यर्च्य· तदुपरि देवस्याग्रे चतुरस्रं मंडलं कोणेषु स्वस्तिक
लांछितं कृत्वा· तन्मध्ये ब्रह्मविष्णवीशान्· प्रतिदिशं लोकपालान्· तदंतराले ध्रुवचिका
दद्याद् रुद्रादित्यादित्य· विश्वेदेवा· साध्य· नासत्य· मरुद्गण· गंधर्वाप्सरसः पितृगणाः पु
ण्यतीर्थानि· तथा विघ्नेशस्कंददुर्गाक्षेत्रपालान्यथावकाशमावाह्य· तन्नामभिर्लिंग
वेदमंत्रैर्वाचयित्वा प्रतिष्ठाप्य देवपार्श्वे देवो नम इत्यर्चा कार्या। ततः ऋत्विजः प्रतिकुंडउ
त्तरतः कलशान्स्थापयेयुः। एककुंडपक्षे एकमेव कलशं कुंडादुत्तरतः स्थापयेत्· आ
चार्यः श्रोत्रियागारादग्निमानीय स्वकुंडे· गृह्योक्त्या प्रतिष्ठाप्य· देवमावाह्यान्त्यर्च्य तन्मित्रगो ५
तत्प्रकाशकमंत्रेण व्याहृतिभिर्वा· पलाशोदुंबराश्वत्थापामार्गसमिदाज्यतिलैरष्ट
सहस्रमष्टशतमष्टाविंशतिं वाहुतीर्जुहुयात्· तत्राज्यहोमे प्रत्याहुतिः संपातं प्र
तिकुंडस्थापितशांतिकलशेषु निक्षिपेत्· ततः शिरसुरोसिपादयोश्च देवं प्रतिदु
ष्कृत्वा स्पृष्ट्वा· स्विष्टकृदादि हुत्वा· पूर्णाहुतिं जुहुयात्· एवमृत्विजोपि स्वस्वकुंडे

अथ मंत्रः॥ त्रैलोक्ये यानि भूतानि स्थावराणि चरा... नारदपर्वतगंधर्व
यक्षराक्षसपन्नगाः॥ ऋषयो मनवो गावो देवमातर एव च॥ सर्वे मामध्वरे रक्षां प्रकुर्वन्तु मुदान्विताः॥ इति दिग्बलि ५

जुहुयुः। सर्वद्वारादिनापकाख्याहोमांतं पुरुषसूक्तं· शतरुद्रिय· ज्येष्ठसाम नीलरुद्रसू
क्तं चावर्तयेयुः। गायत्रीमन्यद्वास्त्रीसूक्तपवमानादि। अधिवासनं त्रिरात्रमेकरात्रं वा कार्यं
तद्रात्रौ विचित्रस्य पिष्टान्नेन रुद्रबलिः कार्यः॥ ॐ नमो रुद्राय सर्वभूताधिपतये दीप्तशू
लधराय उमादयिताय· विश्वाधिपतये रुद्राय वै नमो नमः। शिवागारे तिलकमस्त्रिष्वादेति
मंत्रं बलिस्तत्र श्वेतबलीस्त्वश्वत्थपर्णे· ब्राह्मणेभ्यश्चामिष्टान्नमधिवासनरात्रिसंख्यया द
क्षिणां दद्यात्। श्वोऽद्भृते गर्भगृहे स्थापितपीठिकाहेव्याहेवस्य चाभिषेकं कृत्वा महीमूषु
मातरमिति· देवीमावास्ये· अदितिर्द्यौरिति स्नात्वा· इन्द्रेषु वामं त्रेणषोडशोपचारैः संपूज्य
तेनैव मंत्रेण प्रदक्षिणं कृत्वा· ॐ नइं ङ्गाग्नी तिस्मेकेन प्रासादं प्रोक्ष्य देवं प्राप्यानिष्ठ
ब्राह्मणस्य तद्धस्ते स्थाप्य तं न तमेवाभिमुखं कृत्वा रत्नादि सद्रव्यपुष्पाञ्जलिं दत्त्वा पुरुष
सूक्तेन स्नात्वा आत्मस्नेनेति स्नरथेन गर्भगृहं प्रवेश्य पात्यचर्चः पीठिकागर्ते रत्नसर्वौषध
हिरण्यादिनाम मन्त्रिर्नमो नित्वज्जमौक्तिकवैडूर्य· शंखस्फटिकपुष्परागेंद्रनीलरत्नाकमा
न्यनुक्रमेण निक्षिप्य· गोधूममन्यव· मुद्ग· नीवार· व्रीहिसर्षपश्यामाक· तिलान् रूप्यादि 3

धातुजातं च गर्ते निक्षिपेत्‌ सुवर्णगरुडं वस्मोः शंनो॰ कच्छपं॰ सर्वत्र मनःशिलादिनि क्षि
प्य॰ पायसेन संलिप्य॰ हेमवस्त्रेणाच्छाद्य॰ सुवर्णशलाकामंतरितां न्यस्त्वा॰ द्वाराभिमुखं दे
वं प्रतिष्ठाप्य॰ प्रणवेन न्यस्तेतां न्यासः । सुलग्ने प्रतितिष्ठ परमेश्वरेति शलाकामपसारये
त्‌ । अथ प्राणप्रतिष्ठा॰ प्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुरुद्रा ऋषयः ऋग्यजुःसामानि
छंदांसि॰ क्रियामयवपुः प्राणाख्या देवता॰ प्राणप्रतिष्ठायां विनियोगः । ततो न्यस्त
क्रौं ६ द्विप्रकरणोक्तां गन्यासं न्कृत्वा॰ ॐ आं ह्रीं यं रं लं वं शं षं सं हं सः देवस्य प्राणा इह प्राणाः ।
ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः देवस्य जीव इह स्थितः । ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं
सः देवस्य सर्वेन्द्रियाणि । ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः देवस्य वाङ्मनस्त्वक्चक्षुः
श्रोत्रघ्राणप्राणा इहागत्य स्वस्त्यै सुखेन सुचिरं तिष्ठंतु स्वाहा॰ इति प्राणप्रतिष्ठामंत्रे
ण सजीवं ध्यायेत्‌ । ततो देवस्य दृष्ट्वा तन्मयो भूत्वा॰ ध्रुवा द्यौरिति न्यूचं जप्त्वा॰ प्रणवेन देवेंग
न्यासं न्कृत्वा॰ कर्णे सिंच्याहूति गायत्री नत्वाचार्यः पुरुषसूक्तेनोपतिष्ठेत्‌ । यजमानः कृत्वा
नं देवदेवेश मद्भाग्यात्त्वमिहागतः । मोरुपं त्वामहं दृष्ट्वा वंदे बालवद्भक्तवत्सल । धर्मपि

काममिद्धार्थं स्निरो नवस्त्रनायनः॥ सान्निध्यं तु महादेव स्वाचार्यो परिकल्पय॥ यावच्चंद्रश्च
नित्त्यां स्निष्ठं त्वमतिष्ठानिनि॥ तावत्त्वया नदेवेशाल्लेयं नकानुकंपया॥ भगवन् देव देवेशात्वं
पितासर्वदेहिनां॥ येनरूपेण भगवन् त्वया व्याप्तं चराचरमिति सकृज्जनः शरणं प्रपद्य पुष्पां
जलिंदद्यात्॥ आचार्यायस्त्वर्घादिदत्वा॥ तिकलशोदकेन पंचामृतैश्चाभिषिच्य पुष्प
कशारलोदकेन स्नापयित्वा पुनस्तल्लिंगमंत्रेण संपूज्य पादनामि शिरःसु देवस्य
ब्रह्मादिदैवधीतिन्निजव्याप्यपरिवारदेवताः संपूजयेत् वस्त्रालंकारगोधन हिरण्य माचा
र्याय नदद्यमविघ्नमस्तदर्हं आपकेन्यस्तदर्हं सदस्येभ्यो दद्यात् यथाविभवं ब्राह्मण
भोजनं च आचतुर्थाहिं प्रथमेऽहि वसेमधुना द्वितीये हरिद्रासर्षपपिष्टेन तृतीये स
श्यामखंडयवपिष्टेन लेपनं नस्नानं चतुर्थेऽहमनः शिलाप्रियंगु पिष्टेनोद्वर्त्य अष्टोत्तरश
तकलशैर्मलदर्दुस्तरदर्द्दसंख्यैर्वा क्षीरदधिघृतपंचपल्लवद्रव्ययोर्वा सिद्धार्थादिमंगलद्रव्य
नीर्थहिके गंगादि नदीनदीमावास्य ब्राह्मणैः सहाभिषेकं कारयेत् इदमापः देवे
स्पवास विभुः॥ समुद्रज्येष्ठा॥ आपो हिष्ठेति मंत्रैः॥ ततो देवस्य वयजमानस्याभिषे ४

कं कुर्युः सर्वे जलक्रीडां च॥ प्रतिष्ठोपकरणमाचार्यस्य॥ ७॥ ॥ ७॥ चरप्रति
ष्ठायां तु॥ कुंडमंडपवेदिकरणं न ताच्चतं अकृत्वाचार्य एव सर्वं वदन्निषिच्य सर्व
तोभद्रमंडले दीपयपीठे देवमुपवेश्य सर्वादि दिक्षु वस्त्रयुतपल्लवोपशोभितश्च
पूर्णकलशान् वस्त्राण्यदीपान् प्रज्वाल्य गंधेन नेत्रज्योतिः प्रकल्प्य चित्रबलिं दत्वा
देवमाहात्म्यं स्मृत्वा पुरुषसूक्तेन स्कंतांगदेवतां संपूज्य सर्वविन्मतिदर्यं कृत्वा
देवस्य तौ ह्यामाकुतिं कृत्वा संपातं च कुम्भस्कलशोदिह्ना प्रणामकुतिं कृत्वान्त्यां
गन्यासो कुन्नस्थं देवमानीय पुष्पेण प्रतिमायां लिंगे वा प्रतिष्ठाप्य पंचामृतस्नकं संपा
तं कलशोदकेन इमापद स्मन्निषिच्याग्न्यर्घ्य देवार्चनं दक्षिणादानादिकं सर्वं वदाच
रेत्॥ वापीकूपतडागेषु प्रागुदक्प्रवणे देशे ब्राह्मणैः सह गत्वाचार्यस्त्वि कुंडमं
उपाद्यं च व प्रतिष्ठाप्रकारेणाग्नत्वां यजमानसंमितं क्षीरवृक्षस्य यूपं मंडपप्राग्भागे नि
खाय वेदिमध्ये पद्मगर्भं षोडशारं चक्रं परितश्चतुरस्रमंडलोपेतं मंत्वा॥ चार्य
पद्ममध्ये पल्लीकलशं विस्त्रीर्णानां विनायकस्य च सौवर्णानि स्वरूपाणि तल्लिंग

= जलाशयान् सर्वदेवो पश्चिमदेशोद्गानदेशो वा प्रागुदक्प्रवणे देशं गत्वेत्यर्थः॥ ४॥
= मंडपप्रतिष्ठा मंडपसंबंधिकलशोस्थापयित्वा तदनंतरं यूपं निखेयादित्यर्थः॥ ५॥

मंत्रेण॥समंतात्कलशेषुस्वर्णजलचराणिस्थापयित्वा॰वारुणमंत्रेणार्चयि
त्वा॰तद्बहिर्लोकपालादीन्संपूज्य॰मंडपस्यप्रतिकोणंकोणेनशाचचतुष्टयंपुण्येन
दधिदुग्धकसंयुतंमंगलद्रव्यवस्त्राद्यलंकृतंस्थापयित्वाइमंमेगंगेतिगंगादीन्दिशा
वाद्यान्यर्च्यवारुणंचरुंकृत्वासमुद्रज्येष्ठेतिप्रत्यृचंगायत्र्याज्याहुतीर्हुत्वायामी
तिपंचभिस्त्वंनोअग्नेवरुणस्येतिद्वाभ्यां॰इमंमेवरुणेतिचैकया॰चवाहुतीः॥
स्विष्टकृतंचरुंहुत्वा॰ब्रह्मादिप्रीत्यर्थंतल्लिंगमंत्रैर्जलचरप्रीत्यर्थंतल्लिंगमं
त्रैःसमिदाज्यंहुत्वाशांतिकलशैर्यजमानमभिषिंचेयुः॥सवत्सांगवां॰स
हस्रं॰शतंपंचाशतंवासहिरण्यवस्त्रंदत्वालग्नेसवत्सांगामलंकृत्यसर्वसा
हितिमंत्रेणतज्जलंपाययित्वा॰तडागनैऋतीद्वारस्यैशानांतंहस्तिंकल्पयेत्तामुत्तारि
येत॥आपोअस्मानितिस्वयंतत्पुच्छंगृहीत्वातरेत्॥तांचगांब्राह्मणायदत्वा॰तत
कलशस्थस्वर्णजलचरान्जलेनिक्षिप्य॰पुष्पांजलिंदत्वादेवपितृमनुष्यादयः
प्रीयंतामितिदद्यात्॥आचत्तथहिमुत्सवःप्रवर्तेत॥वसंतग्रीष्मवर्षाशिरद्धेमंत ५

शिशिरेषुतज्जलंस्थितमश्वमेधराजसूयाग्निष्टोमोत्थवाजपेयातिरात्रफलदमिति
॥छ॥एवमारामेष्वपि॥तन्मध्येस्वस्तिवाचनंनांदीश्राद्धं॰वेदिकुंडमंडपर्त्विगाचार्य
वरणादिप्रवर्तेत॥वेदिमध्येसर्वतोभद्रमंडलस्य॰खंडेकुंभंस्थलावलीवापीभद्रंच
पंचमं॥परिधावेष्टितंपद्मंसर्वतोभद्रमंडलमित्युक्तलक्षणपद्ममध्ये॰दलांतर्बहि
र्दिक्षुब्रह्मादिलोकपालदेवानभ्यर्च्य॰वृक्षान्मंगलस्नानवस्त्रगंधादिनासमभ्य
र्च्यतेषुस्वर्णरूप्यफलानिबद्धाःकल्पितनेत्रंस्वर्णशलाकांजनेनांक्त्वा॰स्वर्णसूच्याक
र्णवेधंकृत्वाग्निंप्रतिष्ठाप्यसोमोधेनुमितिचासौम्यचवाहुतिंहुत्वास्विष्टकृदंतं
रंतर्येवसमीदाज्यतिलानष्टशतं॰तदर्धं[illegible]दर्धं॰संख्ययाहुत्वाहोमंसमाप्यशां
तिकलशैर्यजमानमभिषिंचेयुः॥सवत्सहिरण्यादिदक्षिणांदद्यात्॥लग्नेतस
न्मन्त्रेणगामारामध्यादुदङ्मुखीमुत्सृज्यआचार्यायदद्यात्॥शेषमापत्तथा
हंप्रवर्तेत॥फलंतुसर्वकामाप्तिरिति॥स्नपनविष्णुपुराणे॰बौधायनाद्युक्तप्र
तिष्ठाविधिरित्यलंप्रसंगेन॥ ॥श्री॥ ॥इतिश्रीमन्नारायणभट्टकृतौलिंगा

दिप्रतिष्ठाविधिः समाप्तः ॥ ॥ठ॥ ॥ ॥ ॥ठः॥ ॥श्री॥ ॥ठः॥ ॥श्री॥ ॥
इयं संक्षेपतो वाप्यादिप्रतिष्ठा ॥ अथ मे ... पुत्सर्गे नित्वतिरिक्तः ॥ ॥श्री॥ ॥
॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥
संवत् १७४३ वर्षे मार्गशीर्षवदी अष्टमी र... मासे र प्रकाशान्तिता ... पुरनिवासिना लेखकेन लिखितो इयं पद्धतिः ॥ ॥अस्याः ... १५० एतावंतः श्लोकाः ॥ ॥श्री॥ ॥
॥ ॥श्री॥ ॥ठ॥ ॥श्रीगुरुभ्यो नमः ॥ ॥श्रीनिजानंदनाथाय नमः ॥ ॥श्री॥